## सप्तमः पाठः

# महर्षि-जाबालिः

**अयं गद्यांशः 'कादम्बरी' इत्यस्मात् गद्यकाव्यात् उद्धृतः अस्ति। अस्य गद्यकाव्यस्य रचयिता महाकविबाणभट्टः। इयञ्च 'कादम्बरी' समस्तसंस्कृत-कथासाहित्यस्य रत्नं विद्यते। ग्रन्थेऽस्मिन् भाषा-भावयोः शब्दार्थयोश्च समुचितः समावेशः दृश्यते। प्रस्तुते गद्यांशे महर्षेः जाबालेः विशदवर्णनं कृतमस्ति। बाणः सप्तमाब्दे ईशवीये महाराजहर्षस्य कान्यकुब्जेश्वरस्य सभारत्नमासीत्।**

आश्रमस्य मध्यभागमलङ्कुर्वाणस्य, अलक्तकालोहितपल्लवस्य, तापस कुमारिकाभिरालवालदत्तपीतपिष्टपञ्चाङ्गुलस्य परिमण्डलतया विस्तीर्णावकाशस्य रक्ताशोकतरोरधश्छायायामुपविष्टम्, समन्तान्महर्षिभिः परिवृतम्, स्थैर्येणाचलानां गाम्भीर्येण सागराणां तेजसा सवितुः प्रशमेन तुषाररश्मेर्निर्मलतयाम्बरतलस्य संविभागमिव कुर्वाणं वैनतेयमिव स्वप्रभावोपात्तद्विजाधिपत्यम्, कमलासनमिवाश्रमगुरुम्, जरच्चन्दनतरुमिव भुजङ्गनिर्मोकधवलजटाकुलम्, प्रशस्तवारणपतिमिव प्रलम्बकर्णबालम्, बृहस्पतिमिवाजन्मसंवर्धितकचम्, दिवसमिवोद्यदर्कबिम्बभास्वरमुखम्, शरद्कालमिव क्षीणवर्षम्, शान्तनुमिव प्रियसत्यव्रतम्, अम्बिकाकरतलमिव रुद्राक्षवलयग्रहणनिपुणम्, शिशिरसमयसूर्यमिव कृतोत्तरासङ्गम्, वडवानलमिव सततपयोभक्ष्यम्, शून्यनगरमिव दीनानाथविपन्नशरणम्, पशुपतिमिव भस्म-पाण्डुरोमाश्लिष्टशरीरम्, भगवन्तं जाबालिमपश्यम्।

अवलोक्य चाहमचिन्तयम् – अहो प्रभावस्तपसाम्। इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषः प्रतिहन्ति तेजांसि, सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य।

पुण्यानि हि नामग्रहणान्यपि महामुनीनाम्, किं पुनर्दर्शनानि। धन्यमिदमाश्रमपदमयमधिपतिर्यत्र। बहलाज्य धूमपटलमलिनीकृताश्रमस्य भवगतः प्रभावाद्भीतमिव रविकिरणजालमपि दूरतः परिहरति तपोवनम्। एते च पवनलोलपुञ्जीकृतशिखाकलापा रचिताञ्जलय इवात्र मन्त्रपूतानि हवींषि गृह्णवन्त्येत्प्रीत्याशुशुक्षणयः। तरलितदुकूलवल्कलोऽयं चाश्रमलताकुसुमसुरभिपरिमलो मन्दमन्दचारी सशङ्क इवास्य समीपमुपसर्पति गन्धवाहः। प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि। सर्वतेजस्विनामयं चाग्रणीः।

एषः प्रवाहः करुणारसस्य, सन्तरणसेतुः संसारसिन्धोः, आधारः क्षमाम्भसाम्, परशुस्तृष्णालतागहनस्य, सागरः सन्तोषामृतरसस्य, उपदेष्टा सिद्धिमार्गस्य, अस्तगिरिरसद्ग्रहस्य, मूलमुपशमतरोः, नाभि प्रज्ञाचक्रस्य, स्थितिवंशो धर्मध्वजस्य, तीर्थं सर्वविद्यावताराणाम्, वडवानलोलोभार्णवस्य, निकषोपलः शास्त्ररत्नानां, दावानलो रागपल्लवस्य, मन्त्रः क्रोधभुजङ्गस्य, दिवसकरो मोहान्धकारस्य, अर्गलाबन्धो नरकद्वाराणाम्, कुलभवनमाचाराणाम्, आयतनं मङ्गलानाम्, अभूमिर्मदविकाराणाम्, दर्शकः सत्पथानाम्, उत्पत्तिः साधुतायाः, नेमिरुत्साहचक्रस्य, आश्रयः सत्त्वस्य, प्रतिपक्षः कलिकालस्य, कोशस्तपसः सखा सत्यस्य, क्षेत्रमार्जवस्य, प्रभवः पुण्यसञ्चयस्य, अदत्तावकाशो मत्सरस्य, अरातिर्विपत्तेः, अस्थानं परिभूतेः, अननुकूलोऽभिमानस्य, असम्मतो दैन्यस्य, अनायत्तो रोषस्य, अनभिमुखः सुखानाम्।

अस्य भगवतः प्रसादादेवोपशान्तवैरमपगतमत्सरं तपोवनम्। अहो प्रभावो महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तात्मानस्तिर्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति।

## शब्दार्थः

| | | | |
|---|---|---|---|
| अलङ्कुर्वाणस्य | - | शोभमानस्य | (सजे हुए का) |
| अलक्तकालोहितपल्लवस्य | - | यावकवद् रक्तानि किसलयानि | (अलता के समान लालरंग के कोमल पत्ते) |
| विस्तीर्णावकाशस्य | - | अतिदीर्घः अवकाशः | (दीर्घान्तराल) |
| स्थैर्येण | - | स्थिरता | (स्थिरता के द्वारा / ठहराव) |
| अचलानाम् | - | गिरीणाम् | (पर्वतों का) |
| प्रशमेन | - | शान्तया | (शान्ति द्वारा) |
| सवितुः | - | आदित्यस्य | (सूर्य का) |
| तुषाररश्मेः | - | चन्द्रमसः | (चन्द्रमा) |
| अम्बरतलस्य | - | आकाशस्य अधः | (आकाश के नीचे) |
| वैनतेयमिव | - | गरुडमिव | (गरुड़ के समान) |
| उपात्तम् | - | अर्जितम् | (प्राप्त) |
| द्विजेषु | - | विप्रेषु | (ब्राह्मणों में / पर) |
| आधिपत्यम् | - | स्वामित्वम् | (नियन्त्रण में) |
| कमलासनः | - | ब्रह्मा | |
| जरत् | - | पुरातनः | (प्राचीन) |
| भुजङ्ग | - | सर्पः | |
| निर्मोकाः | - | कञ्चुकाः | (केंचुलियाँ) |
| धवलाः | - | श्वेताः | (सफेद) |
| आकुलम् | - | सङ्कीर्णम् | (संकुचित) |
| प्रशस्तः | - | निखिललक्षणयुक्तः | (सम्पूर्णता) |
| वारणपतिम् | - | गजनायकम् | (महावत) |
| प्रलम्बाः | - | अतिविस्तृताः | (अधिक फैला) |
| आजन्म | - | जन्मप्रभृतिः | (जन्म से) |
| कचम् | - | केशम् | (बाल) |
| उद्यत् | - | उद्गच्छत | (निकल गया) |
| अर्कबिम्बम् | - | सूर्यमण्डलम् | (सूर्य का घेरा) |
| भास्वरम् | - | दीप्तिमत् | (प्रकाशवान्) |
| शरत्कालः | - | वर्षासमाप्तिसमयः | (शरदऋतु) |
| शान्तनुः | - | भीष्मपितामहस्य पिता | (भीष्मपितामह के पिता) |
| अम्बिका | - | पार्वती | (गिरिजा) |
| करतलमिव | - | हस्तमिव | (हाथ में आये हुए के समान) |
| रुद्राक्षग्रहणनिपुणम् | - | महेशस्य नयनपिधाने दक्षम् | (भगवान् शङ्कर के नेत्र को बन्द करने में कुशल) |

| | | | |
|---|---|---|---|
| कृतोत्तरासङ्गम् | – | तत्समये सूर्यस्योत्तरदिग्गमनप्रारम्भात् | (सूर्य की उत्तरायण स्थिति) |
| वडवानलम् | – | अग्निम् | (समुद्र में व्याप्त अग्नि) |
| सततपयोभक्ष्यम् | – | निरन्तरं दुग्धमात्रभक्ष्यम् | (दुग्धाहारी) |
| शून्यनगरमिव | – | जनरहितनगरमिव | (जनशून्य नगर के समान) |
| पशुपतिमिव | – | शङ्करमिव | (भगवान् शिव के समान) |
| कनकावदाता | – | काञ्चनवत् निर्मला | (सोने के समान निर्मल) |
| अर्गलाबन्धः | – | शृङ्खलावृत्तः | (जंजीरबद्ध) |
| आयतनम् | – | विस्तृतम् | (फैला) |
| नेमिः | – | धुरिः | (केन्द्रीभूत) |
| मत्सरस्य | – | ईर्ष्यायाः | (ईर्ष्या का) |

## अभ्यासः

**1. एकपदेन उत्तरत–**

(क) महर्षि–जाबालिः कस्य महर्षेः वर्णनं कृतं?

(ख) केषां नामग्रहणानि अपि पुण्यानि भवन्ति?

(ग) एषः प्रवाहः कस्य रसस्य अस्ति?

(घ) महर्षि–जाबालिः केषां निकषोपलः अस्ति?

(ङ) महर्षि–जाबालिः सत्त्वस्य कः?

**2. एकवाक्येन उत्तरत–**

(क) महर्षि–जाबालिः कुत्र उपविष्टः दृष्टः?

(ख) केषां तेजांसि दुरभिभवानि भवन्ति?

(ग) महर्षिः सन्तोषामृतरसस्य कः?

(घ) तेजस्विनां अग्रणी कः?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) महर्षि–जाबालेः आश्रमः कीदृशः?

(ख) जाबालेः आश्रमः केन कारणेन धन्यः?

(ग) तपोवनस्य वैशिष्ट्यं लिखत?

(घ) महर्षि–जाबालेः चारित्रिकवैशिष्ट्यं लिखत?

**4. रिक्तस्थानानि पूरयत–**

(क) महर्षेः नाम................अस्ति।

(ख) अस्मिन् पाठे................आश्रमस्य वर्णनमस्ति।

(ग) महाभूतानामपि दुरभिभवानि भवन्ति..............।

(घ) सर्वतेजस्विनाम्................चाग्रणीः।

(ङ) अहो! ............महात्मनाम्।

**5. उचितं योजयत–**

| | (क) | (ख) |
|---|---|---|
| (क) | महर्षिः | तपोवनम् |
| (ख) | अहो प्रभावः | करुणारसस्य |
| (ग) | दूरतः परिहरति | सत्यस्य |
| (घ) | एषः प्रवाहः | तपसाम् |
| (ङ) | सखा | जाबालिः |

**6. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत–**

(क) जाबालिमपश्यम्

(ख) प्रथमोपगतस्य

(ग) सौदामिनीव

(घ) चाग्रणीः

(ङ) अदत्तावकाशः

**7. अधोलिखितानां पदानां समानार्थकशब्दं लिखत–**

(क) पल्लवस्य

(ख) सवितुः

(ग) वडवानलः

(घ) अवलोक्य

(ङ) चक्षुषः

(च) सौदामिनी

(छ) पुण्यानि

(ज) प्रवाहः

(झ) तीर्थम्

(ञ) सखा

8. **रेखाङ्कितपदानाद्धृत्य प्रश्ननिर्माणं कुरुत-**

(क) कादम्बरी बाणभट्टस्य रचना अस्ति।

(ख) दूरतः परिहरति तपोवनम्।

(ग) प्रभावो महात्मनाम् ।

(घ) सः तपोवने वसति।

(ङ) गुरवे नमः।

9. **महर्षेःजाबालेः आश्रमस्य वर्णनं पञ्चवाक्यैः कुरुत।**

10. **महर्षेः-जाबालेः पञ्चविशेषणानि लिखत?**

## योग्यताविस्तारः -

- समीपस्थवर्तमानाश्रमं पश्यत।
- समीपस्थसंस्कृतपाठशालां गत्वा तत्रत्याध्ययनविधिमवलोकयत।
- पाठे समागतान् षष्ठीविभक्त्यन्तपदान् चित्वा लिखत।